# संस्कृत-वार्ता:

दिनाङ्क :- 18.06.2025 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमंत्री – कनाडा

गतसायं कनाडादेशस्य कनानास्कीस नगरे जी-7 शिखरसम्मेलने प्रधानमंत्री

नरेन्द्रमोदी भागं अगृह्णात्। कैलग्री विमानस्थानके सम्प्राप्तौ तस्य हार्दिकं स्वागतमभवत्। प्रधानमन्त्री ऊर्जासुरक्षा, प्रौद्यौगिक्याः आधारभूतसंरचनायाः, निवेशस्य च विषये चर्चां कृत्वान्, येन परिवर्तनशीलविश्वस्य, उपलब्धता, सामर्थ्यञ्च सुनिश्चिता भवेत्।

शिखरसम्मेलनावधौ प्रधानमन्त्री जी-7 देशानाम् नेत्रिभिः सह विचारविनिमयं अकरोत्, कनाडादेशस्य प्रधानमन्त्री मार्क कार्नी इत्यनेन सह विभिन्न-द्विपक्षीय-विषयेषु उपवेशनं अकरोत्। सः अन्यैः आमन्त्रितैः देशै: अन्ताराष्ट्रियसङ्गठनप्रमुखैः च सह महत्त्वपूर्णवैश्विकविषयेषु विचाराणां आदानप्रदानं अकरोत्। दशकेऽस्मिन् प्रधानमन्त्रिणः मोदिनः कनाडादेशस्य प्रथमा यात्रा अस्ति। पञ्चदशोत्तर-द्विसहस्र-तमे वर्षे अन्तिम-यात्रावधौ द्विपक्षीयसम्बन्धाः सामरिकसहभगितायाः स्तरं च संवर्धितमस्ति ।

### प्रधानमंत्री द्विपक्षीय

प्रधानमन्त्री नरेन्द्रमोदी अब्रवीत् यत् भारत-कनाडादेशयोः द्विपक्षीयसंबन्धाः अतीव महत्वपूर्णाः सन्ति। उभययोः राष्ट्रयोः लोकशासनस्य मानवतायाश्च सुदृढीकरणाय सहकार्यं कर्तव्यम्। श्रीमोदी अवोचत् यत् भारत-कनाडासंबन्धान् अग्रे नेतुं सः समुत्सुको वर्तते। श्री कार्नी महोदयः स्वीये वक्तव्ये अवदत् यत् भारतस्य नियमितं जी 7 सम्मेलनं प्रति सहभागिता भारतस्य प्रधानमन्त्री श्री नरेन्द्रमोदिनः च महत्वं सूचयति।

प्रधानमन्त्रिणा मोदिना जर्मनी, फ्रान्स्, मेक्सिको, दक्षिणकोरिया इत्यादिदेशानां नेतृभिः सह द्विपक्षीय वार्ता विहिता।

फ्रान्स्-राष्ट्रपतिना एम्मानुएल् माक्रों इत्यनेन सह अपि प्रधानमन्त्री मोदी संक्षिप्तं समागमं अकरोत्, यत्र विविधविषये दृष्टिकोणानाम् आदानप्रदानं जातम्।

प्रधानमन्त्रिणा मोदिना दक्षिण-अफ्रीकायाः राष्ट्रपतिना सिरिल् रामाफोसा, ऑस्ट्रेलियायाः प्रधानमन्त्रीना एन्थनी अल्बेनीस्-, इटलीदेशस्य प्रधानमन्त्रिना जॉर्जिया मेलोनी, ब्राज़ील्-राष्ट्रपतिना लुइज़ इनासियो लूला दा सिल्वा-इत्यनेन सहापि संक्षिप्त वार्ता विहिता।

कनाडादेशस्य सफलयात्रायाः समापनानन्तरं प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः यात्रायाः चरमसोपाने क्रोएशियादेशं प्रति यास्यति।

**विदेशमन्त्रालयः भारतीयच्छात्राः**

ईरान्-देशस्य तेहरान्-नगरे भारतीय-दूतावासेन भारतीयच्छात्राः सुरक्षाकारणात्वात् नगरात् बहिः नीताः सन्ति। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् अन्ये निवासिनः ये परिवहनविषये स्वावलम्बिनः सन्ति, ते अपि परिवर्तमानां स्थितिं दृष्ट्वा नगरात् बहिः गन्तुं सूचिताः सन्ति। केचन भारतीयाः आर्मेनिया-देशस्य सीमायां ईरान्-देशात् निर्गन्तुं सुलभतां प्राप्तवन्तः। भारतीयदूतावासः सर्वविध-सम्भव-साहायतां प्रदातुं समुदायेन सह निरन्तरं सम्पर्के अस्ति।

**हॉकी इंडिया मास्टर्स्**

हॉकी इंडिया मास्टर्स् कप् प्रतिस्पर्धायां पुरुषाणां महिलानां च स्पर्धा अद्य प्रात: चेन्नैयां आरभ्यते। महिलानां प्रथमप्रतिस्पर्धायां हिमाचलप्रदेशदलं महाराष्ट्रदलेन सह मेयर् राधाकृष्णन् हॉकी क्रीडाङ्गणे स्पर्धिष्यते। तमिळनाडु-राज्य-हॉकी-एकांशेन आयोजिते अस्मिन् दशदिवसीये टूर्नामेण्ट् मध्ये चत्वारिंशदधिकवयस्काः पुरुषाः पञ्चत्रिंशदधिकवयस्काः महिला: च भागं गृह्णन्ति।

**ऋतु विज्ञान विभाग**

भारतीय ऋतु विज्ञान विभागेन असमे अतिवृष्टेः मेघगर्जनस्य च पूर्वानुमानं कृतम् (Red Alert) संचेतना उद्घोषिता। गृहविभागेन राज्यसरकारं निर्दिष्टम् यत् जनसुरक्षायै सर्वविधकार्यम् अवलम्बनीयम् इति ।

भारतर्तुविज्ञानविभागेन अद्य सौराष्ट्र-कच्छक्षेत्रयो: अतिवृष्टेः पूर्वानुमानं प्रकटितम्।

॥ **इति वार्ता:**॥